श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनृसिंहराघवदासेन कृतं

# ॥ श्रीवेदान्तरामानुजमहादेशिकन् स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेदान्तरामानुजमहादेशिकन् स्तोत्रम् ॥

श्रीमद्वेदान्तरामानुजमुनिकरुणालब्ध वेदान्तयुग्मं
  श्रीमच्छ्रीवासयोगीश्वर गुरुपदयोरर्पितस्वात्मभारम्।
श्रीमच्छ्रीरङ्गनाथाह्वयमुनिकृपया प्राप्तमोक्षाश्रमं तं
  श्रीमद्वेदान्तरामानुजमुनिमपरं संश्रये देशिकेन्द्रम्॥

अब्देऽस्मिन् विभवे विवस्वति गते मीनं छदे पाण्डरे
  पञ्चम्यां मृगलक्ष्मणो मृगशिरोनक्षत्रयुक्ते दिने।
श्रीमच्छ्रीनिधियोगिवर्यकरुणासंप्राप्त सर्वार्थकः
  श्रीमद्वेदवतंसलक्ष्मणमुनिः श्री रङ्गनाथं ययौ॥ **1** ॥

विभवाब्दे झषे शुक्लपञ्चम्यां विधुवासरे।
वेदान्तलक्ष्मणमुनिः स्वाचार्यचरणावगात्॥ **2** ॥

श्रीपतेः करुणा लोकदुःखनीहारभानुभा।
अव्याद्वेदशिरो रामानुजाख्य गुरुरूपिणी॥ **3** ॥

मतरक्षणदत्तमतिः यतिपतिसन्दिष्टमार्गपान्थाग्र्यः।
कुमतिगिरिकुलिशरूपो रक्षतु निगमान्तलक्ष्मणाख्यगुरुः॥ **4** ॥

ते गुणाः शीलवात्सल्यसाम्यादयः प्राप्य सर्वेश्वरं ये स्वसत्तां ययुः।
प्रापुरद्याश्रितास्तं गुरुं पूर्वतोऽप्युन्नतिं तेन संप्रेषितं भूतले॥ **5** ॥

वेदयुग्मविलसत्सुधीर्गुरुः ज्ञानशीलयुतवृत्त शेवधिः।
सम्प्रदायपरिरक्षणक्षमः शिष्यबृन्दमवसात्कृपानिधिः॥ **6** ॥

दानजितकामधेनुः कारुण्यसुधाकलानिधिर्भौमः।
जयति गुरुरस्मदीयो जैत्ररथो यतिराजराजवीथ्याम्॥ **7** ॥

तमोगुणविमोहितं कलितपापजातं सदा
कदध्वगमसारवाङ्मनसपङ्किलं सङ्कुलम्।
विकत्थन विदूषितं विबुधगर्हितं मानवं
रिरक्षिपति कः पुमानखिलदादृते देशिकात्॥ **8** ॥

राजीवो वेदयुग्मावनकृतधिषणः कूर्मरूपः श्रितानां
कोलो वेदार्थमुस्तानिचयनिगलने वादिसङ्घे नृसिंहः।
क्रान्त्वा लोकं स्वकीर्त्या परशुधरमुनिः दम्भराजन्यहन्ता
तालाङ्कोऽज्ञानधाराविदलनविषये राजतेऽसौ गुरुर्नः॥ **9** ॥

मासखोपि धृततापसवेष राम एष निगमान्तविवेके।
कृष्णतामुपगतः कलिहन्ता ह्येक एव सकलार्थकरोऽभूत्॥ **10** ॥

नुतः पण्डितलोकेन वृतः शिष्यगणैस्सदा।
श्रितो मोक्षार्थिभिस्सद्भिः स्थितस्सर्वनृणां हृदि॥ **11** ॥

जनिमतामवनाय चकार यज्जनिशते कृपया मधुनाशनः।
सकलमेकपदे कृतवानसौ निगमशेखरलक्ष्मणयोगिराट्॥ **12** ॥

मज्जन्तं शिशुमस्मदादिकमभीक्ष्याज्ञानरोगाप्लुतं
स्नेहाद्रक्षितुमञ्जसात्र गुरुणा मातृत्वमासादितम्।
भ्रान्ति ध्वान्त विदारणाय महता मार्ताण्डतासादिता
मायावादिविदारणे कृतमहो शार्दूलविक्रीडितम्॥ **13** ॥

हा हन्तेति न वक्तव्यं गुरूणां विरहार्दितैः।
तत्कृपासारनिर्धूतकल्मषैर्नाकजेतृभिः॥ **14** ॥

देव त्वत्पादपङ्केरुहधृतमतयः सन्ति केचिद्धरेण्याः
    किं तैः त्वद्दत्तभाग्भिः विपुलमसुलभं त्वां विचिन्वद्भिरार्यैः।
त्वद्दास्यं त्वद्विभूतिं निरवधिकतयास्माकमापादयद्भिः
    श्रीमद्वेदान्त रामानुजमुनिवचनैरेव दत्ताभयाः स्मः॥ **15**॥

शितं शरं मर्मणि सम्प्रयुज्य भोः विकत्थसे काल वृथा जहीहि तत्।
यदस्मदीया गुरवः सुधामयैः वचोभिरस्मद्धृदयेषु शेरते॥ **16**॥

का त्वं माये कुत्र धाम त्वदीयं नागन्तव्यं मत्सकाशं भवत्या।
अद्य स्वान्ते नः स्वदन्ते गुरूणां वाचो हृद्या वेदसारानुलिप्ताः॥ **17**॥

यति क्ष्माभृदक्षतं स्वमार्गमत्र रक्षितुम्।
समैधताद्य वेदमौळि राघवानुजात्मना॥ **18**॥

नमस्तस्मै लीलाविजितविमतभ्रान्त मनसे
    कलिक्षोभप्रोद्यत्तिमिरनिकराकाशमणये।
श्रिताशेषाघौघप्रशमनसमुद्यत्स्मितजुषे
    सुसम्पत्सन्धात्रे यतिनृपतिरूपाय गुरवे॥ **19**॥

महते करुणार्द्राय महावैभवशालिने।
श्रुत्यन्त लक्ष्मणाख्याय गुरवेऽस्तु नमो नमः॥ **20**॥

॥ इति श्रीवेदान्तरामानुजमहादेशिकन् स्तोत्रं समाप्तम्॥